2. **बाँवर हस्तलिखितग्रन्थः** – बशर्ते बाँवेर इत्याख्यः भूगर्भियनगरे भोजपत्रे लिखित प्राचीनं हस्तलिखितग्रन्थस्य गुच्छमेकम् अवाप्नोत्। 56 पृष्ठानि अस्यां पाण्डुलिप्याम् आसीत्। अधिकः भागः उभयपक्षे लिखितमासीत्। लेखनं शुक्लमश्याम् अनेकजनैः लिखितमासीत्। केचनपृष्ठाः स्पष्टतया दृश्यन्ते स्म। अवशिष्टाः विरूपं प्राप्तवन्तः आसन्। 1890 ई मध्ये मध्य एशिया कुचा समीपे कुमतुरा नामकस्थाने एकस्मिन् प्राचीनबौद्धस्तूपावशेषे भोजपत्रे लिखिता एका पाण्डुलिपिः प्राप्ता। कर्नलः एतां पठितुं बंगाल एशियाटिक सोसायटी कलकत्तां प्रति प्रेषितवान्। अस्याः रिपोर्ट अप्रैल 1890 मध्ये सोसायटी पत्रिकायां प्रकाशितं जातम्। तदधुना आक्सफोर्ड बोल्डायन लाईब्ररी मध्ये वर्तते। एव बाँवेर पाण्डुलिपिः। पूर्ण, सम्यक् गुप्तकालीनब्राह्मीलिप्यां, सप्तग्रन्थानां सा समूहः, आयुर्वेदप्राचीनतमस्वरूपं प्रकटयति, सर्वसाधारणवस्तुमाध्यमेन लशुनं नवनीतादिना चिकित्सा कथं कर्तुं शक्यते इति विवरणं वर्तते।

प्राकृतमिश्रितसंस्कृतभाषा गद्यपद्य उभयविधा शैलीः, अग्निवेशः, भेदः , हारीतः, जातुकर्णः, क्षारपाणिः चरकः , सुश्रुतादीनां नामोल्लेखनम् अस्मिन् वर्तते। अस्य सम्पादकः हार्नल।

3. **गिलगित पाण्डुलिपयः**– बौद्धसंस्कृतेः मुख्यं केन्द्रगिलगिट सम्प्रति पाक – अधिकृतकाश्मीरे मुजफ्फराबादजनपदे वर्तते। तत्र अत्यन्तप्राचीनबौद्धस्तूपे सा पाण्डुलिपिः प्राप्ता। अजान् यः चरणं कारयति तेन प्राप्ता इयं। अधुना सा काश्मिरस्य हस्तलिखितग्रन्थसङ्ग्रहालये वर्तते। नष्टप्रायः, अपूर्णः लेखनशैली अद्भुताः, पाली तथा संस्कृतभाषाः, भट्टाचार्यविद्यवारिधिशिवनाथशर्मणः सहयोगेन डा . एन् . ए . दत्तः अस्याः सम्पादनम् अकार्षीत्। भारते प्राप्तासु पाण्डुलिपिषु प्राचीनतमा एषा। एकः पाठः समाप्य अपरपाठारम्भवेलायां स्थलं न त्यक्तम्। अतः अस्याः तुलना तिब्बती काष्ठोत्कीर्णनेन सह शक्यते। अस्य हस्तलिखितस्य ग्रन्थाधारेण प्रथमः ग्रन्थः गिलगित मैन्युस्क्रिप्टस् काश्मीरशासनार्थ भट्टाचार्य– विद्यवारिधिशिवनाथशर्मणः सहयोगेन डा . एन् . ए दत्तः अस्याः सम्पादनम् अकार्षीत्।

4. **गॉडफ्रे हस्तलिखितग्रन्थः** – कार्गिल समीपे लेह – कारगिल इत्यत्र व्यापारिकमार्गः नष्टः आसीत्। कैप्टन् गाडफ्रे पठान व्यापारिणां कृते एतं मार्गात् गन्तुं साहाय्यं अकार्षीत्। अतः ते वणिजः कृतज्ञताप्रकटनार्थं हस्तलिखितग्रन्थान् उपहाररूपेण अदुः। अस्य हस्तलिपिग्रन्थस्य कृते गाइफ्रे हस्तलिखितग्रन्थः इत्युच्यते। अस्मिन् ग्रन्थस्य 71 रचनानि सन्ति। अस्य एकस्यांशस्य उद्धृतं हार्नल सन् 1897 मध्ये अकरोत्।

5. **होरियूजी हस्तलिखितग्रन्थः** – यामाटो मध्ये होरियूजी संघाराम मध्ये प्रज्ञापारमिताह्रदयसूत्रं तथा संशियो धारिणी इति नामक ताडपत्रद्वयं प्राप्तम्। ऐनक्डोटा ऑक्सन् अस्य सम्पादनम् अकरोत् 1609 मध्ये जापान् प्रति नीतवन्तः। बौधिधर्मस्य काश्यपेन लिखितमिति श्रूयते। 11.5 दीर्घ 2 इन्च अगल अस्ति। 16.5 पंक्तिः वर्तते प्रत्येकं पृष्ठे। अन्यस्मिन् ताडपत्रे सप्त पंक्तयः। गुप्तलिपिः सदृश ब्राह्मीलिपिः। 6 शताब्दी पूर्वतनम्।

6. **भोजपत्रे हस्तलिखितग्रन्थः** – महाभारतस्य एषः हस्तलिखितः ग्रन्थः शारदालिप्यां वर्तते। आदि एवं वनपर्वणः अंशः, सभापर्वः पूर्णतया वर्तते। बम्बई राज्ञः कृते बुलर एतं ग्रन्थं क्रीतवान्। 16–17 शताब्दी, 114 पत्राणि, महाकाव्यस्य लघुसंस्करणस्य प्रतिनिधिः।

7. **आदिपर्वन् का प्राचीनतम उपलब्धग्रन्थः**– एषः ताडपत्रे लिखितः हस्तलिखितः ग्रन्थः। नेपालस्य राजगुरुः हेमराज पण्डितजू प्राप्तवान्। 1800 वर्ष प्राचीनम् , हल्की मश्यां लिखितं, महाभारतस्य आदिपर्व मात्रमस्ति। सम्पूर्ण पत्रं न नष्टमस्ति एकोपि। 21, 2.7 इन्च आकारः, प्रत्येकं पृष्ठे 7 पंक्तिः, ताफल छः संख्या 40 सादृशी लिपिः।

8. **पैप्पलाद हस्तलिखितग्रन्थः** – अथर्ववेदस्य पैप्पलाद हस्तलिखितः ग्रन्थः जम्मू तथा काश्मीरस्य स्वर्गीयमहाराजा रणवीरसिंहस्य समीपे आसीत्। 1875 मध्ये लेफ्टिनेंट विलियम म्यूर कृते दत्तवान्। जर्मनी प्रं राथ कृते सः दत्तवान्। तस्य मरणानन्तरं एषः ग्रन्थः ट्यूबिनजेन यूनिवर्सिटी प्राप्तम्। भोजपत्रम्, 275 पत्राणि, उभयपक्षात् लिखितमस्ति। शारदालिपिः, 450 वर्ष प्राचीनतमं 25–20 आकारः, अमिटमशी, आद्रता प्रभाव न भवति अत्र।

**संदर्भ सूची :–**


1. पाण्डुलिपिविज्ञान– डॉ. सत्येन्द्र
2. भारतीयपुरालेख– डॉ. संदीप कुमार
3. भारतीयपुराविज्ञान– कृष्णादत्त वाजपेयी
4. शोधप्रविधि एवं पाण्डुलिपिवज्ञान– प्रो० अभिराजराजेन्द्र मिश्र एवं डॉ० राजेशकुमारी मिश्रा।
5. www-namami-gov-in
6. www-bharatiyakritisampada-nic-in



शोधच्छात्रा
केन्द्रीयसंस्कृतविश्वविद्यालयः
जयपुरपरिसरः, जयपुरम्

# संप्रेषण तकनीकी

– संदीप कुमार शर्मा

**संप्रेषण** – संप्रेषण शिक्षा की "रीढ़ की हड्डी" है । बिना संप्रेषण के शिक्षा और शिक्षण दोनों की कल्पना नहीं की जा सकती है । संप्रेषण शब्द अंग्रेजी के communication का हिंदी पर्याय है । इसकी उत्पत्ति लेटिन भाषा के 'कम्ययूनीस' से मानी जाती है, जिसका अर्थ है – 'सामान्य' । अतः संप्रेषण ऐसी प्रक्रिया है, जिसमें व्यक्ति परस्पर सामान्य बोध के माध्यम से आदान–प्रदान करने का प्रयास करता है ।

**संप्रेषण का अर्थ** – "परस्पर सूचनाओं तथा विचारों का आदान–प्रदान (विनिमय) करना है। संप्रेषण प्रक्रिया में व्यक्ति अपने ज्ञान, हाव–भाव, मुखमुद्रा एवं विचारों आदि का परस्पर आदान–प्रदान करते हैं और उन प्राप्त विचारों को सही अर्थों में समझने और प्रेषण में उपयोग करते हैं। संप्रेषण अपनी बात को दूसरों तक पहुंचाने की और दूसरों की बातें सुनने की, सूचनाओं, संवेदनाओं एवं विचारों के विनिमय की एक प्रक्रिया है ।

1. **लीगन्स के अनुसार** – "संप्रेषण वह प्रक्रिया है, जिसके द्वारा दो या दो से अधिक लोग विचारों, तथ्यों, भावनाओं तथा प्रभावों आदि का इस प्रकार विनिमय करते हैं, कि सभी लोग प्राप्त संदेशों को समझ पाते हैं । संप्रेषण में संदेश देने वाले तथा संदेश ग्रहण करने वाले के बीच संदेशों के माध्यम से समन्वय स्थापित किया जाता है ।

**संप्रेषण की विशेषताएं** –

1. संप्रेषण परस्पर समन्वय स्थापित करने की एक प्रक्रिया है ।
2. इसमें विचार–विमर्श तथा विचार–विनिमय पर विशेष ध्यान देते हैं ।
3. यह द्विवाही प्रक्रिया है, अर्थात् 2 पक्ष होते हैं – प. सन्देश प्रदाता, पप. सन्देश ग्रहणकर्ता
4. संप्रेषण एक उदेश्य युक्त प्रक्रिया होती है ।
5. उत्तम शिक्षण के लिए प्रभावी संप्रेषण प्रमुख तत्व है ।

6. संप्रेषण सदैव गत्यात्मक प्रक्रिया होती है ।

7. संप्रेषण में विचारों का मौखिक, लिखित व सांकेतिक रूप में आदान–प्रदान किया जाता है ।

8. संप्रेषण सामाजिक प्रक्रिया है, इससे मानवीय संबंध दृढ़ होते हैं ।

## संप्रेषण प्रक्रिया (Process of Communication)

**संप्रेषण प्रक्रिया का मॉडल –**




**एनकोडिंग –** वह प्रक्रिया जिसमें किसी विचार की अभिव्यक्ति के लिए संकेतों या प्रतीकों का प्रयोग किया जाता है ।

**डिकोडिंग –** वह प्रक्रिया जिसमें संदेश प्राप्तकर्त्ता संदेश स्रोत से प्राप्त संकेतों या प्रतीकों का कुटानुवाद करता है और संदेश ग्रहण करता है ।

**संप्रेषण के प्रकार** – शिक्षण में संप्रेषण के प्रकारों का वर्गीकरण –



**(क) शाब्दिक संप्रेषण –**

इसमें हमेशा भाषा का प्रयोग होता है । यह संप्रेषण मौखिक शब्दों से और लिखित शब्दों या संकेतों से किया जाता है ।

(i) **मौखिक संप्रेषण** – इसमें मौखिक रूप से अभिव्यक्ति एवं सुनकर सूचनाओं या विचारों का आदान–प्रदान किया जाता है । इस संप्रेषण में सम्प्रेषक और संप्रेषी दोनों आमने–सामने रहते हैं, जैसे – वार्ता, चर्चा, प्रश्नोत्तर, कहानी इत्यादि ।

(ii) **लिखित संप्रेषण** – इस संप्रेषण में लिपि का महत्त्व है, इसमें संप्रेषक एवं संप्रेषी का आमने–सामने होना जरूरी नहीं है । संदेश प्रदाता लिखित रूप में शब्दों या संकेतों से संदेशों का विनिमय करता है । इसमें भाषा सरल सुगम स्पष्ट होनी चाहिए ।

**(ख) अशाब्दिक संप्रेषण –**

इस प्रकार के संप्रेषण में भाषा का प्रयोग नहीं किया जाता है । इसमें –

(i) **वाणी संकेत संप्रेषण** – इसमें सम्प्रेषक व सम्प्रेषी आमने–सामने होते हैं तथा व्यक्तिगत रूप से वाणी के छोटे–छोटे रूप में सम्प्रेषण होता है । जैसे – हां हां, हूं हूं, YES-YES, सीटी बजाना, मुस्कुराना, ठहाके लगाना इत्यादि ।

(ii) **मुख मुद्राएं एवं चक्षु संपर्क** – यह भी व्यक्तिगत संप्रेषण होता है । इसमें eye contact (चक्षु सम्पर्क) एवं मुख मुद्राओं का प्रदर्शन प्रभावी होता है । कक्ष्या में एक शिक्षक चक्षु संपर्क से छात्र की मनरूस्थिति को जानने में सफल होते हैं। मुखमुद्राएं संवेगात्मक स्थिति को प्रदर्शित करती है । मुखमुद्राएं पर भय, क्रोध, प्रसन्नता आदि का संप्रेषण सरलता से होता हैं । विशिष्ट बालकों के लिए अत्यंत उपयोगी संप्रेषण है ।

(iii) **स्पर्श संप्रेषण** – इसमें स्पर्श को ही संप्रेषण का प्रमुख माध्यम बनाया जाता है । स्पर्श से ही व्यक्ति की भावनाओं का पता चल जाता है । जैसे – हाथ

मिलाना, दिखावा करना, माता के हाथ का एक स्पर्श शिशु को बहुत कुछ कह जाता है । दृष्टिहीन बालकों के लिए स्पर्श संपर्क संप्रेषण महत्वपूर्ण है । ब्रेल लिपि स्पर्श संप्रेषण का माध्यम होती है ।

**शिक्षण अधिगम में संप्रेषण –**

प्रभावशाली शिक्षण अधिगम प्रक्रिया के लिए प्रभावशाली संप्रेषण आवश्यक होता है। प्रभावशाली शिक्षण में शिक्षक एवं छात्र मिलजुलकर प्रभावशाली संप्रेषण के लिए प्रयास करते हैं । हरबर्ट महोदय के अनुसार "शिक्षण का कार्य विचारों तथ्यों व सूचनाओं को छात्रों तक पहुंचाना है" ।

शिक्षक जितना प्रभावशाली ढंग से इनका संप्रेषण करता है, उतना ही सफल शिक्षक कहा जाता है । संप्रेषण शिक्षक और छात्र दोनों बांधे रखने में उन्हें प्रभावित करने में अहम् भूमिका निभाता हैं । प्रभावी संप्रेषण के लिए विधियो, शिक्षण व्यूहरचनाओं, उपागमो इत्यादि संप्रेषण तकनीकों का प्रयोग किया जाता है । जिससे शिक्षण अधिगम प्रक्रिया का विकास होता है ।

शोधच्छात्र
केन्द्रीयसंस्कृतविश्वविद्यालय, जयपुर



# उच्चशिक्षायाः विद्यार्थिषु भविष्यनिर्माणस्य कृते मानसिकासन्तुलनस्य निवारणे समाजस्य भूमिका

– डॉ. अलका शर्मा

**प्रस्तावना** – शिक्षायाः विकासः समाजस्य परिवर्तनेन सह विविधैः नवाचारैः प्रक्रियाभिश्च भवति। मनुजस्य प्रकृतिः शिक्षयैव निर्मिता भवति। शिक्षाप्रक्रिया मानवस्य शक्ति – बुद्धि – कार्यकुशलता – प्राकृतिकक्षमतानाञ्च सम्पूर्णविकासे सहायिका भवति। शिक्षयैव मानवस्य व्यक्तिगतसामाजिकजीवनयोरनुकुलितवातावरणस्य निर्माण भवर्ति शिक्षयैव मानवस्य प्रगतिः सम्भवः। शिक्षया तात्पर्यमस्ति – ज्ञान – शक्ति – अधिगम – मानव – समाजस्य च विकासकरणम्। शिक्षा अकादमिकविषयरूपे विद्यार्थीन् शिक्षयति प्रौढ़मानवाञ्च निर्देशयति। शिक्षया एव व्यक्तिगतसामाजिकजीवनयोः गुणवत्तायाः विकास भवति।

उच्चशिक्षा शिक्षा एकस्य श्रेष्ठमानवस्य निमाणं करोति। शिक्षयैव मानवः श्रेष्ठपदमाप्नोति। शिक्षपामुचिताचरण – तकनीकीदक्षता – शिक्षण – विद्यायाश्च प्राप्तिरित्यादयः समाविष्टाः सन्ति। उच्चशिक्षायां विश्वविद्यालयैः, व्यावसायिकाविश्वविद्यालयैः, कम्यूनिटीविद्यालयैः, लिबर्ट – आर्टमहाविद्यालयैः प्रौद्योगिकीसंस्थानैश्च शिक्षा प्रदीयते। प्रार्थमिकमाध्यमिक शिक्षयोः अपरां इयं शिक्षा शिक्षायाः तृतीयस्तरः विद्यते, यः प्रायशः एच्छिकं भवति। श्रेण्यामस्यां स्नातकशिक्षा – परास्नातकशिक्षा – व्यावसायिकीशिक्षा – प्रशिक्षणञ्चेत्यादयः आयान्ति। शिक्षाकोशलानां, व्यापाराणां, मानसिकनैतिकसौन्दर्यविषयकयोः उत्कर्षस्योपरि केन्द्रिता अस्ति।

**मानसिकासन्तुलनम्** – मानवः एवास्ति यः मानसिकासन्तुलनमुत्पन्नं करोति। तस्य च विक्षोभानामानुसारं देहस्य विभिन्नानामवयावानां सामान्य कार्यपद्धत्यामवरोधमुत्पन्नं करोति, व्याध्यश्चातिक्रमणं करोतीति। कस्यचिदप्युद्देश्यस्य प्राप्तये यदा वयं प्रयत्नं कृत्वा अपि सफलतां न आप्नुमः, तदैव मानसिकासन्तुलनस्यानुभवं कुर्मः। मानसि कासन्तुलनस्याधिक्ये

असन्तुलनस्य स्थितिः उत्पन्नं भवति। मानवस्य जीवने इदमसन्तुलनं सदैव हानिकारकमेव न भवति अपितु लक्ष्यप्राप्तये प्रेरितमपि करोति। मध्यमस्तरस्या सन्तुलनमुपलब्धीन् लबधमाने सहायको भवति। निर्णयक्षमयतायां हीनता, कस्यचिदपि परिस्थितेः नकारात्मकपक्षदर्शनं, कस्यापित घटनायाः विषये चिन्तनम, स्मरणशक्त्यां ध्यानकेन्द्रणे वा न्यूनता, सदैव चिन्तायां ग्रस्तश्चेत्यादयः मानसिकासन्तुलनस्य लक्षणानि सन्ति।

सामान्यतया यैः कारणैः असन्तुलनमुत्पतति चेत् तस्य कारणस्य निवारणेन सह अन्तुलनं समाप्तं भवितुमर्हति परन्तु यदि मानवः दीर्घकाले यावन्तम् असन्तुलने ग्रस्तः भवति तर्हि तस्य दुष्परिणामाः अपि भवन्ति। एते दुष्परिणामाः एव जीवनं जटिलं कुर्वन्ति। उच्चरक्तचापः, ह्रदयरोगः, मधुमेहः, मानसिकासन्तुलनमित्यादयः स्थितयः असन्तुलनस्य प्रभावाधिक्येन कारणेन उत्पतन्ति तथा चास्माकं जीवनस्य जटिलतान् वर्धयन्ति। अतः अस्माभिः असनतुलनस्य स्थितिं दूरीकरणस्य प्रयासं करणीयः, येनास्माकं जीवनं सुखमयं भवेत्।

**मानसिकासन्तुलनस्य निवारणे समाजस्य भूमिका** – मानसिकासन्तुलनस्य निवारणे विद्यार्थिषु भविष्यनिमार्णस्य कृते समाजस्य महती भूमिका भवति। मानवाः समाजे एव मानवीयक्रियाकलापाः, कुर्वन्ति। तेषु क्रियाकल्पेषु आचरण – सामाजिकसुरक्षा – निर्वहनमित्यादयः क्रियाः आयान्ति। समाजे वसित्वा एव मानवाः परस्परं स्नेहपूर्ण व्यवहारं कुर्वन्ति। समाजे एव बालकाः समाजस्ज्ञय नियमैः अवगताः भवन्ति तथा नियमानुसारं ध्ययपथे कार्य कुवन्ति। विद्यार्थीनामपि कर्तव्यमति यत् ते यथार्थवादिनो भूत्वा अवास्तविकस्य लक्ष्यस्य निर्धारणं न कुर्युः। परेषां सहयोगेनापि कार्यं कर्तुं शक्यन्ते। बालकेन समयस्य सदुपयोगः करणीयः। स्वकीयमित्रैः तथा परिवारेण सह समयं वितरेत्। अहंकारं त्यजेत्। पर्याप्तमात्रायां निद्रां गृह्णयेत्। नकारात्मकचिन्तनेन दूरी भ्वेत्। सदैव व्यायामः कर्तव्यः। परामर्शमपि गृह्णयेत्। समाजे वसित्वा एव बालकः एकः श्रेष्ठः नागरिकः भवितुमर्हति। अत एव उच्चते यत् बालकानां भविष्यनिमाणे मनिसिकासन्तुलनस्य निवारणे समाजस्य महती भूमिका भवति।

## सन्दर्भग्रन्था :


1. शर्मा, गणपतिराय, उदीयमान भारतीय समाज और शिक्षा, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुरम्।

2. शर्मा, डॉ ब्रह्मदेव, शिक्षा समाज और व्यवस्था, मध्यप्रदेश हिन्दी ग्रन्थ अकादमी।

3. सिनसिनवार डॉ. सुरेन्द्र सिंह, तंवर डॉ. कल्याण सिंह, विश्नोई सीमा, लिंग विद्यालय एवं समाज, ठाकुर पब्लिकेशन्स प्रा. लि. जयपुरम्।

4. पाण्डेय डॉ. के पी, शिक्षा के दार्शनिक एवं समाज शास्त्रीय सिद्धान्त, आर लाल बुक डिपो मेरठ, उत्तरप्रदेशम्।



प्राचार्या
श्रीमती मोहरी देवी तापड़िया शिक्षा शास्त्री महाविद्यालय
जसवन्तगढ़, नागौरम्




# अग्निपुराणे प्रलयकालविमर्शः

– अमृतकुमारशर्मा

अस्मिन् अध्याये अग्निपुराणे समागतानां प्रलयकालिकतत्त्वानां विमर्शः क्रियते। अत्र अदौ जगतः सृष्टेः वर्णन क्रियते। अस्य जगतः सृष्टिः श्रीहरेः लीलामात्रम् अस्ति। विष्णुरेव स्वर्गादीनां रचयिता अस्ति। सृष्टिः प्रलयश्च तस्यैव स्वरूपमस्ति। सृष्टेः आदिकारणमपि विष्णुरेवास्ति। विष्णोरेव निर्गुणत्वमपि अस्ति सगुणत्वम् अपि च। सर्वादौ सत्सवरूपः अव्यक्तः ब्रह्म एवं आसीत्। तस्मिन् काले न तु आकाशस्य सत्ता आसीत् न च रात्रिदिवसयोः विभागः आसीत्। तदनन्तरं सृष्टिकाले भगवान् विष्णुः प्रकृति प्रविश्य तां विकृतां कृतवान्। ततः परं प्रकृतितः महत्तत्वस्य तस्माच्च अहंकारस्य प्रादुर्भावो जातः। अहंकारस्य त्रिविधत्वं प्रकल्पितम् वैकारिकः (सात्विक) तैजसः (राजस) भूतादिरूपः तामसश्च। तामसाहंकारात् शबदतन्मात्रायुक्तः आकाशः प्रादुर्भूतः। आकाशात् स्पर्शतन्मात्राव्यवहारवतः वायोः प्रादुर्भावः जातः। वायोः रूपतन्मात्रायुतस्य अग्नेः उत्पतिः जाता। अग्नितात्वात् रसतन्मात्रायुतायाः भूमेः प्रादुर्भवो जातः। इयं तामसाहंकारात् जायमाना सृष्टिः वर्तते। इन्द्रियाणि तैजसाहंकारात् प्रादुर्भूतानि। दशेन्द्रियाणि मनसः देवता च इयं वैकारिकाहंकारस्य सृष्टिरस्ति। ततः परं बहुविधायाः प्रजायाः उतपादनस्य संकल्पयुक्तः भगवान् स्वयम्भूः सर्वादौ जलस्य सृष्टिं कृतवान् एवश्च स्वस्य शक्तेः (वीर्यस्य) आधान कृतवान। जलं नारत्वेन ज्ञायते यतोहि तत् नरात् उत्पद्यते। नार (जलम्) एव भगवतः विष्णोः अयनं (निवासस्थानम्) आसीत् अतः भगवान् विष्णुः नारायणत्वेन अपि ज्ञायते। **तदुक्तम्** –

**रसमात्रा आप इतो गन्धमात्रा धरित्र्यभूत् ।**
**अहंकारात्तमासात्तु तैजसानीन्द्रियाणि च ।**
**वैकारिकदशदेवा मन एकादशेन्द्रियम् ।**
**ततः स्वयम्भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ।।**
**अप एव ससर्जादौ तासु वीर्यमवासृजत् ।**

**आपो नारा इति प्रोक्ता आपो वै परसूनवः ।।**
**अयनं तस्य ताः पूर्व तेन नारायणः स्मृतः ।**[1]

अग्निपुराणस्य सप्तदशाध्याये जगतः सृष्टेः वर्णनप्रसंगे उक्त यत् भगवता विष्णुना यत् वीर्य संस्थापितं तत् जले स्वर्णमयस्य अण्डरूपे प्रकटितम्। तस्मिन् सुवर्णाण्डे भगवतः ब्रह्मणः प्रादुर्भावो जातः। सः भगवान् हिरणगर्भः तस्मिन् अण्डे वर्ष यावत् निवासं कृतवान् अनन्तरं तम् अण्डं द्वेधा विभाजितवान्। तस्य विभक्तस्य अण्डस्य एकः भागः धुलोकः अपरश्च भूलोकोऽभवत्। तयोः अण्डखण्डयोर्मध्ये आकाशं सृष्टवान्। जलस्योपरि परिप्लवां पृथ्वीं स्थापयामास एवश्च दश दिशानां विभागं कृतवान्। ततः परं सृष्टेः इच्छायुतः प्रजापतिः काल–मनस्–वाणी–काम–क्रोध–वशिष्ठः एतेषां सप्तर्षीणां प्रादुर्भावोऽपि ब्रह्माणा स्वस्मात् मनसः कृतः। एते सप्तर्षयः रूद्रगणाश्च प्रजावर्गस्य सृष्टिं कुर्वन्ति। ब्रह्माणा स्वस्य शरीरस्थ भागद्वयं कृतवान्। अर्द्धभागात् सः पुरूषः अर्धाच्च स्त्री अभवत्। तदनन्तरं तस्मात् स्त्रीगर्भात् प्रजानां सृष्टिम् अकरोत्। तावेव स्वायम्भुवः मनुः शतरूपा नाम्ना च प्रसिद्धौ अभवताम्। आभ्यामेव मानवीया सृष्टिभूत्। तदुक्तम् अग्निपुराणे –

**वशांसि च ससर्जादौ पर्जन्यं चाप्य वक्त्रतः।**
**ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये।**
**साधयास्तैरयजन्देवान्भूतमुच्चावचं भुजात्।**
**सनत्कुमारं रूद्रं च ससर्ज क्रोधसम्भवम् ।।**
**मरीचिमत्र्यग्ङिरसं पुलस्त्यं पुलहं क्रतुम् ।**
**वसिष्ठं मानसान्सप्त ब्राह्मणानिति निश्चितम् ।।**
**सप्तैते जनयन्ति स्म प्रजा रूद्राश्च सत्तम ।**
**द्विधा कृत्वात्मनो देहमर्धेन पुरूषोऽभवत् ।।**
**अर्धेन नारी तस्यां स ब्रह्मा वै चासृजत्प्रजाः ।।**[2]

अग्निपुराणे पुनः जगत्सर्गवर्णनम् आरभते यत् प्रकृतितः पूर्वं महत्तत्वस्य सृष्टिभवत्

तच्च ब्रह्मसर्गत्वेन ज्ञायते। द्वितीयश्च तन्मात्राणामाविर्भावो जातः तच्च भूतर्गत्वेन ज्ञायते। तृतीया वैकारिकसृष्टिरस्ति, तच्च ऐन्द्रियकसर्गत्वेन ज्ञायते। अनेन प्रकारेण बुद्धिपूर्वकं प्रकटितः प्राकृतसर्गः त्रिविधः भवति। चतुर्था यत् सृष्टिरस्ति सा मुख्यसर्गत्वेन प्रसिद्धास्ति। मुख्यं नाम स्थावराणाम्। यस्मात् पशुपक्षीणामुत्पत्तिरभूत् सः तैर्याग्योन्याख्यः पंचमः सर्गः। ऊर्ध्वस्रोतसां सृष्टिः देवसर्गत्वेन ज्ञायते अयश्च षष्ठः सर्गः। एतदनन्तरं अस्स्रोतसां सृष्टिभवत्, तच्च सप्तमः मानवसर्गः। अष्टमः अनुग्रहः सर्गः अयश्च सात्विकः तामसश्चापि वर्तते। अत्र क्रमशः अन्तिमाः पंञ्चसर्गाः वैकृतसर्गाः सन्ति एवश्च आरम्भिकाः त्रयः सर्गाः प्राकृतसर्गाः प्रोक्ताः। प्राकृतसर्गः वैकृतसर्गः नमवः कौमारसर्गश्च ब्रह्मणः प्रादुर्भूताः। एते नव सर्गाः अस्य जगतः मूलकारणानि सन्ति। **तदुक्तम अग्निपुराणे –**

**तथो र्ध्वस्रोतसां षष्ठो देवसर्गस्तु स स्मृतः ।**
**ततोऽस्रोतसां सर्गः सप्तमः स तु मानुषः ।।**
**अष्टमोऽनुग्रहः सर्गः सात्विकस्तामसश्च यः ।**
**पंञ्चैते वैकृताः सर्गाः प्राकृताश्च त्रयः स्मृताः ।।**
**प्राकृतो वैकृतश्चैव कौमारो नवमस्तथा ।**
**ब्रह्मतो नव सर्गास्तु जगतो मूलहेतवः ।**[3]

जगतः सर्गप्रक्रियाविषये पुनरूच्यते यत् ख्यात्यादिदक्षकन्याभिस्साकं भृग्वादिमहर्षयः विवाहम् अकुर्वन्। केचन जनाः नित्य–नैमित्तिकप्राकृतभेदात् त्रिधा सृष्टिं स्वीकुर्वन्ति। ये प्रतिदिनं जायमानात् अवान्तरप्रलयात् जन्म स्वीकुर्वन्ति, अयं नित्यसर्गत्वेन ज्ञायते। भृगोः भार्या ख्यातिः धाताविधाता इत्याख्यायोः द्वयोः देवतयोः माता अभूत् एवश्च एव स्तवनम् अकरोत् । धातातः प्राणस्य विधाताश्च मृकण्डुकस्य जन्म अभवत्। मृकण्डोः पुत्रः मार्कण्डेयः आसीत्। मार्कण्डेयात् वेदशिरा अभवत्। मरीचेः भार्या सम्भूतिः पौर्णमासाख्यां पुत्रम् अजनयत्। अग्डिरायाः पत्निः स्मृतेः गर्भात् अनेकपुत्राणाम् एवश्च सिनीवाली–कहू–राका–अनुमति इत्याख्यानां चतसृणां कन्यकानां जन्म अभवत्। अत्रेः भार्या अनसूया सोम–दुर्वासादत्तात्रेयाख्यानां त्रयाणां पुत्राणां माता अभवत्। **तदुक्तम् अग्निपुराणे –**

**धातुर्विधातुर्द्वौ पुत्रौ क्रमात्प्राणो मृकण्डुकः ।**
**मार्कण्डेयो मृकण्डोश्च जज्ञे वेदशिरास्तथा ।**
**पौर्णमासश्च सम्भूत्यां मरीचेरभवत्सुतः ।**
**स्मृत्यामङ्गिरसः पुत्राः सिनीवाली कुहूस्तथा ।।**
**राका चानुमतिश्चात्रेनसूयाप्याजीजनत् ।**
**सोमं दुर्वाससं पुत्रं दत्तात्रेयं च योगिनम् ।।**[4]

सृष्टिक्रमं रूपयिष्यन्नाह अग्निपुराणे यत् पुलस्त्यमुनेः भार्या प्रीतिः दत्तोलिनामकस्य पुत्रस्य माता अभूत्। पुलहस्य भार्यायाः क्षमायाः गर्भात् सहिष्णोः सर्वपादेश्च जन्म अभवत्। क्रतोः भार्या सन्नतितः बालखिल्यनामकाः षष्टिः सहस्रं पुत्राणां जन्म अभवत्। वशिष्ठस्य भार्या ऊर्जा सजा–गात्र ऊर्ध्वबाहु–सवन–अनघ–शुक्र–सुतपा एतेषां सप्तानां माता अभूत्। स्वाहाग्नायोः पावकः पवमानः शुचिः इत्यादयः पुत्राः अभवन्। एवमेव अजात् अग्निष्वप्त, बर्हिषद् अनिग्न साग्निश्च पितरः अभवन्। पितृभ्यः स्वधायां मैना वेधारिणी च पुत्रीद्वयमभवत्। अधर्मस्य भार्या हिंसा, एतयोः अमृताख्याः पुत्रः निकृति इतयाख्या च कन्या अभवत्। एताभ्यां भयस्य नरकस्य च जन्म अभवत्। अभस्य भार्या नरकस्य च पत्नी वेदना अभवत्। मायातः मृत्योः वेदनातः च दुःखस्य जन्म अभवत्।

**ब्रह्मणः एकः रोदमानः पुत्रः अभवत्, रोदनात् सः रूद्रो जातः। अयं रूद्रः तदुक्तम् –**

**कन्यानिकृतिस्ताभ्यां भयं नरकमेव च ।**
**माया च वेदना चैव मिथुनं त्विदमेतयोः ।।**
**तयोर्जज्ञेऽथ वै माया मृत्यु भूतापहारिणम् ।**
**वेदाना च सुतं चापि दुःखं जज्ञेऽथ रौरवात् ।।**
**मृत्योत्र्याधिजटाशोकतृष्णाक्रोधाश्च जज्ञिरे ।**
**ब्रह्मणश्च रूदखाते रोदनाद्रुद्रनामकः ।।**[5]

स्वायंभुवसर्गवर्णनप्रसंगे अग्निपुराणे उक्तं यत् भुवनकोशषस्य भूमेंः द्वीपादीनाश्च लक्षणानां वर्णनं अत्र क्रियते। आग्रीघ्र अग्निबाहु, वपुष्मान् द्युतिमान, मेधा, मेधातिथि, भव्य, सवन एवश्च क्षयः एते प्रियव्रतस्य पुत्रा आसन्। पित्रा तेभ्यः सप्तद्वीपः प्रदत्ताः। आग्रीध्राय जम्बूद्वीपः – मेधातिथि प्लक्षद्वीपः, वपुष्मते शाल्मलिद्वीपः, ज्योतिष्मते कुलद्वीपः, द्युतिमते क्रौञ्चद्वीपः तथा च भव्याय शाकद्वीपः दतः । सर्वनाय च पुष्करद्वीपः प्रदत्तः। आग्रीघ्र स्वपुत्रेषु लक्षयोजनपरिमितः जम्बूद्वीपः विभाजितवान्। नाभि इत्यास्य कृते हिमवर्षः (भारतम्) प्रदतः। किम्पुरूषाय हेमकूटवर्षः हरिवर्षाय नैषधवर्षः, इलावृताय मध्यभागे मेरूपर्वतयुक्तः इलावृतवर्ष, रम्यकाय नीलाचलाश्रितः रम्यकवर्षः, हिरण्यवते श्वेतवर्षः, कुरवे च उत्तरकुरूवर्षः प्रदत्तः। भ्रदाश्चाय भद्राश्चवर्षः केतुमालाय केतमालवर्षः प्रदत्ताः।

## सन्दर्भाः –


1. अग्निपुराणम् 17/1–7/1–12
2. अग्निपुराणम् 17/8–17
3. अग्निपुराणम् 20/1–6
4. अग्निपुराणम् 20/1–12
5. अग्निपुराणम् 20/13–20



शोधच्छात्र<br>
ज्योतिषविभागः<br>
ज.रा.रा.सं.वि.वि., जयपुरम्

# ज्योतिषशास्त्रस्य षडांगानि

– दिव्यान्शुशर्मा

सुविदितोऽयं विषयः यत् सर्वेषां श्रेयोमार्गप्रदर्शकाः वेदाः एवेति। वेद शब्दस्य च व्यत्पत्तिः एवं विद्यते "विदन्ति अनेन इति वेदाः" इति समस्त वागंमयस्याधारः भवन्ति चत्वारो वेदाः। श्रवणमनेनावलोकनेन च महर्षिणां चिन्तकानां दृष्टिपथे समुन्दूताः वेदाः। वेदास्तु सर्व ज्ञान विज्ञान सम्पन्नाः यथाध्येन गवेषणेन कश्चिदपि विषयःनोपलभ्यो भवति। किन्तु वेदागंनां ज्ञानमन्तरा वेदार्थः न शक्य। अतः सकल विद्यानिधीनां वेदानां व्याख्यानाय वेदागंनि उत्पन्नानि

**तानि च वेदागंनि –**

**शिक्षा व्याकरणं छन्दो निरूक्तं ज्योषिं तथा ।**
**कल्पश्वेति षडगंनि वेदस्याहुर्मनीषिणः इति ।**

**पुनः एतेषं षण्णां महत्त्वं निरीक्ष्यैव पाणिनीयशिक्षयां प्रतिपाद्यते –**

**दन्द पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठयते ।**
**ज्योतिषामयनं चक्षंर्निरूक्तं श्रोत्रमुच्यते ।।**
**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं ।**
**तस्मात्साड़ांगमधीतयैव ब्रह्मलोके महीयते[1] ।।**

## वेदागेंषु ज्योतिषशास्त्रस्य स्थानम् –

वेदानां स्मयकार्थवबोधंकत्वादेव वेदाडागानां वेदागंत्वम् । तत्र ज्योतिषमिति वेदागत्वेनन्यतम्। वेदोक्त कर्म करणे कालविधायक कार्यमेव ज्योतिषस्य वेदागंत्वे हेतुः। लोक कल्याण यज्ञार्थमभिप्रवृत्ताः वेदाः । प्रकृतेरादनाय तिथि वार नक्षत्र उदयास्तध्रुव समये यज्ञादेः व्यवस्था आसीत्। अतः इमें यज्ञाः कालाधीनाअ यतः सुष्ठुकाले कृतमेव यज्ञादि कर्म साफलयं

[1]पाणिनीय शिक्षा 41–42

भजते, अकाले विहितं कर्म वैफल्यं प्रयातीति। तस्य कालस्य ज्ञानं तावत् पृथ्वी–सूर्य–चन्द्र–ग्रह– नक्षत्राणामाधारेण भवति।

ग्रहनक्षत्रादिज्योतिषः पिण्डानां गत्यादि ज्ञानं ज्योतिषशास्त्रान्तरा न केनापि साध्यम्। एवं वेदोक्त यज्ञक्रियादिषु कालनिर्णयमनेन शास्त्रेणैव भवतीति ज्योतिषस्य वेदागंत्वमुपपन्नम्।

**यथोक्तं भास्कराचार्येण –**

**वेदास्तावत् यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालश्रयेण ।**
**शास्त्रादस्मात् कालबोधो यतः स्यात् वेदागंत्वं – ज्योतिषस्योक्तमस्मात ।।**

**तथा च वशिष्ठः –**

**क्रतु क्रियार्थं श्रुतयः प्रवृत्ताः कालाश्रयास्ते क्रतवो निरूक्ताः ।**
**शास्त्रादमुष्मात् किल कालबोधो वेदागंतामुष्य ततः प्रसिद्धः ।।**

**एवं सिद्धान्तराजे तु –**

**वेदायज्ञस्य प्रवृत्ता यजनमथ ककुन्कालयोनिश्चयेन ।**
**दिक्कालो भग्रहेभ्योनुमित परिमित ते पुनर्गोलसंस्थः ।।**
**गोलोनम्मोन्नतत्वं तदपमपलतस्ते तु सिद्धान्तगम्ये ।**
**तस्माद्वेदागंमग्यं नयनाभिहितं ज्योतिषं शास्त्रमेतत ।। इति**

**श्रुत्युत्तमाङ्ग ज्योतिषम् –**

ज्ञानात्मकस्य वेदपुरुषस्य षद्गुष्याड्गनि भवन्ति। व्याकरणादीनि तत्र प्रकृतिप्रत्यय विभाग पुरस्सरं शब्दानुशासनं व्याकरणं भवति वेदपुरुषस्य मुखम्। वर्ण स्वर मात्रा यति प्रभृतिः बलादि उच्चारणविधेरूपदेशिका शिक्षा भवति वेदपुरुषस्य नासिका रचनायां वर्णमात्रा यति प्रभृतिः नियामकं शास्त्रं निरुक्तं। एतत् वेदपुरूषस्य श्रोत्रात्वेन संज्ञितम्। वेदोक्त यज्ञादि विवरणं प्रतिपादिकानि श्रोत्रसूत्राणि श्रुति समस्त गृहस्थकर्म प्रतिपादिकानि ग्रहसूत्राणि जीवनोपयोगी विषय निर्देशरूपाणि धर्मसूत्राणि यज्ञवैदिकसम्बद्धानि शूल्वसूत्राणि च कल्प इति, कल्पो भवति

तस्य हस्तौ। ज्योतिष ज्योतिषचक्राधारेण–वेदोक्तकालनिर्णयार्थं प्रवृतं शास्त्रं तत् ज्योतिषशास्त्रम्। तत् वेदपुरुषस्य नेत्राड्ंगत्वेन – चिन्तितम्। एवमेतेष्वड्ंगेषु सर्वेन्द्रियाणां नयनं प्रधानम्–इत्युक्त दिशा नेत्राड्ंगभूतमिदं ज्योतिषशास्त्रं श्रुत्युक्तमाडंग भवति। **तथा चोक्तम्–**

**शब्दशास्त्रं मुखं ज्योतिषं चक्षुषीश्रोत्रमुक्तं निरुक्तम च कल्पः करौ ।**
**यातु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यै बुधैः ।।**
**वेद चक्षुः कलेदं स्मृतं ज्योतिषं, मुख्यता चाड्ंगमध्ये–स्य तेनोच्यते ।**
**संयुक्तो–पीतरैः कर्णनासादिभिः, चक्षुषाड्ंगेन हीनो न किञ्चितकरः ।। इति**

**तथा –**

**यथा शिखा मयूराणां नागानां मणयो यथा ।**
**तद्वेदाड्ंग शास्त्राणां ज्योतिषं मूर्न्धिस्थितम् ।।**

**इत्थं च ज्योतिषशास्त्रं यद्वेदाड्ंगेषु सर्वातिशायि श्रेठत्वं भजते इति ।**

**ज्योतिषशास्त्रस्य षडांगानि –**

**1. जातक शास्त्रम् –**

यत्र जन्म कालिक ग्रहद्यावास्थितिमाधारीकृत्य जातस्य भूत – वर्तमान – भविष्यश्शुभाशुभफलादेशः क्रियते। तज्जातकम् आकशे हि यानि नक्षत्राणि द्दग्गोचराणि जायन्ते तानि सर्वाणि समप्रकृतिवभ्ददासन्ते। परं नक्षत्रेषु आद्यन्तं महदन्तरं वर्तते। यथा तेषु नक्षत्रेषु स्थूल सूक्ष्मप्रखरज्योतिर्मयस्वल्पज्योतिर्मयमेवनेके भेदाः उतपद्यन्ते। तेन नक्षत्रवशात् च शुभाशुभफलविचारः विचार्यन्ते।

**2. गोलः –**

**द्दष्टान्त एवान्निभ ग्रहाणां संस्थानमान प्रतिपादनार्थम् ।**
**गोलः स्मृतः क्षेत्र विशेष एवं प्राज्ञैरतः स्यादगणितेन गम्यः ।।**

(सिद्धान्त शिरोमणि गोलाध्यायः 5.5)

इति श्लोकेनात्र गोल स्वरूपमुच्यते। गोलस्तु क्षेत्र विशेषः एव गोलदृष्टान्ते निखिलग्रह गणित प्रतिपाद्य पदार्थस्वरूप युक्ति प्रतिपादनात् ग्रन्थस्यापि गोलाभिधेयता। क्षेत्र विशेषश्च गणितगम्या एव भवति।

**अयमेवार्थः श्रीपतेः श्लोकेनापि सङ्गच्छते –**

**ग्रहनक्षत्रधरित्री संस्थानस्येदं दर्शनोपायाः ।**
**गोल इति कथ्यते–सौ क्षेत्रविशेषौ गणितगम्यः ।।**

### 3. शकुनशास्त्रम् –

शकुनशास्त्रस्यैव निमित्त शास्त्रमिति नामान्तरं दरीदृश्यते। पूर्वजन्म कर्मणः शुभाशुभ फलं शकुनं सूचयति। तदुक्तं हि प्रश्नमार्गे –

**अन्य जन्मान्तर कृतं कर्मपुंसां शुभाशुभं ।**
**यतस्य शुकनः प्रोक्तं निवेदयत पृच्छताम् ।।**

**शुभाशुभ भेदात् शकुनं द्विविधं प्रोच्यते।**

### 4. प्रश्नशास्त्रम् –

प्रश्नशास्त्रं ज्योतिषशास्त्रस्य महत्वपूर्णमङ्ग भवति। जातकं नास्ति तदापि प्रश्नशास्त्रस्याधारेण एव पृच्छकस्य समस्त प्रश्ननां यथार्थ फलं वक्तुं शक्यते। प्रश्सास्त्रे दैनंदिन वनसम्बन्धित समस्त प्रश्नानां विश्लेषणमेव शास्त्रीयविवेचनमपि क्रियते।

### 5. मुहूर्तः –

ज्योतिषशास्त्रस्य षडङ्गेषु मुहूर्तः अन्यतमः। मुहूर्तः ज्योतिःशास्त्रस्य संहिता स्कन्धे–न्तर्भवतीति केचन् वदन्ति। होरास्कन्धे–न्तर्भवन्तीत्यन्ये वदन्ति। तिथिवारनक्षत्रयोगकरणानि पञाङ्गन्युच्यते। एतेषां पंञाङ्गधारेण शुभसमयः निश्चिते। अस्यैव मुहूर्तःइति व्यवहारः। यः कोऽपि पुरुषः शुभमुहूर्ते दुमुहूर्ते वा यत् किमपि कार्यं करोति चेत् तस्य फलं न केवलमिह जन्मन्यपितु तस्य वंशजैरनुभोक्तव्यमेव।

## 6. गणितम् –

ज्योतिष ज्योतिश्शास्त्रस्य षडङ्गेष्वन्यतमम्। अङ्गगणितम् बीजगणितम् चेत्येतइद द्वयमपि ग्रहविज्ञानस्याङ्गत्वेन मतम्। आर्यभट्टः ब्रह्मगुप्तः, भासकराचार्यश्वेते त्रयोः विपश्विद्वराः ग्रहतन्त्रस्य रचयितारः सन्ति। गणिततन्त्रस्य धन–ऋण–गुणा–भागहाराख्य चत्वारो–पि विधयः वर्ग–घन–वर्गमूल–धनमूलभिधाश्व विधिविशेषाः भास्कराचार्य, ब्रह्मगुप्त कृतेषु त्रैशाशिक विषये विषयास्तत्राकलिताः सन्ति। भास्कराचार्यब्रह्मगुप्तौ, सरल समीकरणसिद्धान्तं सविशदं विवृण्वन्तौ द्स्येते। त्रिकोणमिति तेन च भरतीयाः विद्वांसो–धिकारं निहितवन्तः।

**सन्दर्भग्रन्थाः –**


1. डॉ. रामचन्द्रपाण्डेयः, ज्योतिवदिाभारणम्, मोतीलाल बनारसीदास्, वाराणसी, 1994 ।
2. सीतारामझा, ताजिकनीलकण्ठी, चौखम्भ संस्कृतप्रतिष्ठानम्, दिल्ली, 1992 ।
3. श्रीनिवासाचार्यः, प्रश्नमार्गम्, ज्योतिर्विज्ञानप्रकाशनम्, उड्डुपी, 1984 ।
4. गोपेशकुमारः, फलदीपिका, मोतीलाल बनारसीदास्, वाराणसी, 1996 ।
5. मुकुन्दबल्लभमिश्रः, फलितमार्तण्डः, मोतीलाल बनारसीदास्, वाराणसी, 1968 ।
6. श्रीनारायणशर्मा, बृहज्ज्योतिषसारः, ठाकुरप्रसाद एण्ड सन्स् कुकसेलर्, वाराणसी, 1968।
7. श्रीसुरेशचन्द्रमिश्रः, बृहज्जातकम, रंज्जन् पब्लिकेशनस्, दिल्ली, 1995 ।



शोधच्छात्र

केन्द्रीयसंस्कृतविश्वविद्यालयःजयपुरम्

# ज्योतिषशास्त्रस्योद्भवः विकासश्च

– अजयकुमारशर्मा

यदि वयं पक्षपातं त्यक्त्वा विचारयामः तर्हि स्पष्टं भविष्यति यत् अन्येषां शास्त्राणां इव भारतीयाः अपि अस्य शास्त्रस्य मूल आविष्कारकाः सन्ति। भारतीयगुरुणां मूर्तरूपं मन्यमानं योगविज्ञानं तस्य मेरुदण्डः अस्ति अत्र ऋषयः योगाभ्यासद्वारा सूक्ष्मबुद्ध्या शरीरान्तर्गतं सौरमण्डलं दृष्ट्वा स्वनिरीक्षणेन आकाशीयसौरमण्डलस्य व्यवस्थां कृतवन्तः। अस्य शास्त्रस्य प्राणरूपं संख्याशास्त्रस्य उत्पत्तिः भारते एव अस्ति। मध्ययुगीन भारतीयसंस्कृतिः इति पुस्तके श्री ओझा जी इत्यनेन लिखितम् अस्ति यत् भारतेन अन्येभ्यः देशवासिनः यत् सर्वाधिकं महत्त्वपूर्णं विषयं शिक्षितं तत् अस्ति। संख्याशास्त्रं, गणितं सम्पूर्णेषु ज्योतिषादिषु अद्य या प्रगतिः प्राप्यते तस्य मूलकारणं वर्तमानसंख्याक्रमः अस्ति, यस्मिन् 1 तः 9 तथा 0 पर्यन्तं संख्याः, एतैः 10 चिह्नैः सह संख्याशास्त्रस्य सर्वं कार्यं प्रचलति, एषः क्रमः गृहीतः आसीत् इति च विश्वेन स्वीकृतम्।

पूर्वोक्तोद्धरणात् स्पष्टं भवति यत् प्राचीनकाले भारतीयऋषयः खगोलशास्त्रं ज्योतिषशास्त्रे च परिचिताः आसन्। स्पष्टोल्लेखस्य अभावात् सः ग्रीसदेशात् आगतः इति कथ्यते। परन्तु चिन्तनेन वास्तविकं वस्तु एवं न दृश्यते। यतोहि निवेश शब्दनां प्रमाणे तैः होरा (आरोही एवं राशि) हिबुक (जन्मकुण्डल्याः चतुर्थभावः) आपक्लोक्लीं, द्रेष्काण (राशेः तृतीयांशः), कण्टक (चतुर्थभावः), पणकर, अनाफा, सुनफा, दुर्धारा (योगविशेषः), तुंग (उच्चस्थानम्), मुसल्लह (नवमंश), मुन्था (जन्मग्नेस्थितः कस्यचिदपि वाञ्छितवर्षस्य चिन्हम्), इन्दुवर, इथाशल, इस्राफ, यमुना, मणऊ (योगविशेष) प्रस्तुताः कृतवन्तः।

प्राचीनभारते ग्रीसदेशात् अनेके छात्राः वर्षाणि यावत् भारतीयगुरुभिः सह भिन्नशास्त्राणाम् अध्ययनं भिन्नशास्त्राणाम् अध्ययनं कर्तुं च आगच्छन्ति स्म, यस्मात् कारणात् अत्यधिकसम्पर्कस्य अनेकानि कारणानि सन्ति। तिस्रशताब्द्यां षड्शताब्द्याः अन्तः केचन च भारते ज्योतिषशास्त्रे बहवः ज्योतिषज्ञाः प्राप्ताः।

डब्ल्यू. डब्ल्यू. हन्टरमहाभागानुसारं सिन्द–हिन्दनामाख्येन भारतीयज्योतिष सिद्धान्तानामरबीभाषायाम् अनुवादमकरोत्। अरबीभाषायां लिखिते 'ऐन उल अम्बाफितल कलुली अटवा' पुस्तकेऽस्मिन् लिखितमस्ति यत् भारतीयविद्वान्सः अरबीभाषायान्तर्गते बगदादक्षेत्रस्य

राज्यसभायां गत्वा ज्योतिषशास्त्रस्य चिकित्साशास्त्रस्य च अध्यापनं अकुर्वन्, कर्क नामकविद्वान् ज्योतिष एवं चिकित्साशास्त्रयोर्ज्ञानार्थं शकसंवत 614 तमे वर्षे सम्राट अलमसूरस्य दरबारेऽगच्छत्। राशिचक्राणां ग्रहाणां च स्पष्टनामानि न प्राप्नुवन्रूपा या द्वितीया युक्तिः दत्ता, सा व्यर्था। यतः प्राचीनसाहित्ये यदा सौरलोकनक्षत्राणां उल्लेखः भवति तदा कथं स्थूलतत्त्वराशिज्ञानं न स्यात्।

चक्रशब्दः ऋग्वेदसंहितायां आगतः, यत् राशिचक्रबोधकम् अस्ति। अस्मिन् मन्त्रे 'द्वादशारम् नहि तज्जराय' द्वादशारं शब्दः 12 राशीनां बोधो कारयति। प्रकरणविशेषेषु ध्यानं दत्त्वा मन्त्रे वा द्वादशराशिनां दिशायां वा स्पष्टता भविष्यति। उत्तरप्रदेशस्य पूर्वमुख्यमन्त्री डॉ. सम्पूर्णानन्दः श्द्वादशारंश इति शब्दे द्वादशराशिबोधकत्वेन शङ्कयति तथा च द्वादशमासस्य वाचकस्य सम्भावना वर्तते। किन्तु तस्य सम्भावना तार्किकी नास्ति। कारणं स्पष्टं यत् अस्य मन्त्रस्य अग्रिमे भागे 12 राशिषु 360 दिवसाः विचारिताः सन्ति। 13 मासेषु 360 दिवसाः न भवितुम् अर्हन्ति। यतोहि चन्द्रः 29 दिवसान् न अतिक्रमति। एतदनुसारमेकस्मिन् वर्षे 354 दिनानि भवन्ति, परन्तु मन्त्रे 360 दिवसानामोल्लेखं कृतमस्ति।

प्रत्येकस्मिन् राशौ 30 डिग्री भवति तथा प्रत्येकभागस्य औसतमानः एकदिवसः भवति, इत्थं द्वादशराशिचक्रे 360 दिनानि भवन्ति। जैन – ज्योतिषस्य विद्वान्सः गर्ग, ऋषिपुत्र एवं कल्काचार्येण पारम्परिकराशेः प्रतिनिधित्वमकरोत्। केचन पाश्चात्यविद्वान् भारतीयज्योतिषशास्त्रं बेबिलोनदेशात् आगतं इति वदन्ति। तैः लिखितम् अस्ति यत् भारतीयाः बेबिलोनदेशं गत्वा ततः ज्योतिषशास्त्रं शिक्षन्ति स्म।

कस्मिन् अपि शास्त्रे विज्ञानकालस्य अध्ययनं कर्तुं तस्य इतिहासं ज्ञातुं शक्यते। यतोहि तस्य शिरस्य इतिहासस्य माध्यमेन विषयस्य रहस्यम् अवगम्यते सदस्यः अस्य शास्त्रस्य अध्ययनं कुर्वन् आसीत्। अतः अस्य शास्त्रस्य उत्पत्तिस्थानं कालं च निश्चयेन ज्ञातुं किञ्चित् कपटं भवति। अन्यज्ञानस्य स्रोतस्य उत्पत्तिं ज्ञातुं शक्यते। परन्तु प्रकृतेः अद्वितीयस्य अन्यस्य बालकस्य अन्वेषणं मानवशक्तितः परम् अस्ति तमसंख्याशास्त्रम् अन्ये वा। शब्देन इदमपि वक्तुं शक्यते यत् मनुष्यः चेतनाप्राप्तिदिनात् आरभ्य सः ज्योतिषस्य अत्यावश्यकतत्त्वानां अध्ययनं कर्तुं आरब्धवान्, यद्यपि तस्य अन्येषु जीवने च एतेषां तत्त्वानां अभिव्यक्तिक्षमतायाः अभावः आसीत्। तत् न शक्तवान् तत्त्वैः विना सम्भवाः अभवन्, फलतः मानवजीवनस्य विकासेन सह ज्योतिषशास्त्रस्य विकासः अभवत्। कालवर्गीकरणदृष्ट्या अस्य शास्त्रस्य इतिहासः निम्नलिखितयुगेषु विभक्तुं शक्यते।

- अन्धकारयुगः — ई.पू 10000 ई.पू।
- उदयकालः — ई.पू 10001 ई.पू. 500 पर्यन्तम्।
- आदिकालः — ई.पू. 501 ई.पू 500 ई. पर्यन्तम्।
- पूर्वमध्यकालः — ई. 501 ई. 1000 ई. पर्यन्तम्।
- उत्तरमध्यकालः — ई.1001 ई. 1600 ई. पर्यन्तम्।
- आधुनिक या अर्वाचीनकालः — ई. 1601 ई. 1941 ई. पर्यन्तम्।

उपर्युक्तकालवर्गीकरणं ज्योतिषस्य विकासस्य आधारेण कृतम्, यद्यपि भारतीयसंस्कृतेः इतिहासः अपि उपर्युक्तखण्डेषु विभक्तः अस्ति। परन्तु ज्योतिषशास्त्रं शाश्वतक्षयम् इति मत्वा अपि मुख्यं ध्यानं विकासे एव कृतम् अस्ति भोजनव्यवस्थायाः।

तात्पर्यम् अस्ति यत् आधुनिकयुगे पाश्चात्यज्योतिषस्य सम्पर्कात् गणितज्योतिषस्य सिद्धान्तानां वैज्ञानिकविमर्शः आरब्धः अस्ति। यदि भारतीयज्योतिषी आकाशनिरीक्षणं स्वीकृत्य नूतनज्योतिषेण सह तुलनां कुर्वन्ति तर्हि पूर्वमध्यकालीनकालात् गृहगणितस्य सारणीनां स्थूलता दूरीकृत्य भारतीयज्योतिषस्य महत्त्वं अन्यदेशवासीनां कृते प्रकटितव्यम्।

**सन्दर्भाः—**


1. जातकपारिजातः, ले.श्रीवैद्यनाथदेवज्ञः, सं .डॉ. सुरेशचन्द्रमिश्रः, चौखम्बासुभारतीप्रकाशनम् वाराणसी, 2006।
2. पञ्चाङ्गविज्ञानम्, डॉ. कैलाशचन्द्रशर्मा, जगदीशसंस्कृतपुस्तकालयः जयपुरम्।
3. वृहत्पाराशरहोराशास्त्रम्, ले. श्रीपाराशरमुनिः, सं. डॉ. पद्मनाभशर्मा, चौखम्बा सुभारती प्रकाशनम् वाराणसी, 2004।
4. जातकालङ्कारः, ले. श्रीगणेशकविः, सं. डॉ. सत्येन्द्रमिश्रः, चौखम्बासुभारतीप्रकाशनम् वाराणसी, 2003।
5. भारतीय ज्योतिष का इतिहास, डॉ. गोरखप्रसाद, उत्तरप्रदेश हिन्दी ग्रन्थ अकादमी, लखनऊ—2004 ।



शोधच्छात्रः, ज्योतिषशास्त्रम्
जगद्गुरुरामानन्दाचार्यराजस्थान
संस्कृतविश्वविद्यालयः जयपुरम्

# शिक्षायाः अवधारणा

– संजयकुमारशर्मा

ज्ञानं विद्या शिक्षेति पदत्रयं सूचनाप्रदानादानप्रदानयोरर्थे प्रकारान्तर्येण प्रयुज्यते। शिक्षाग्रन्थाः वर्णोच्चारणविधिविशेषतो वर्णयन्ति। कथं वर्णाः उच्चारणीयाः। किं तेषां स्थानम् ? कश्च तत्र यत्नः ? कण्ठताल्वादीनामुच्चारणे किं महत्त्वम् ? कति वर्णाः ? कति स्थानानि ? कति स्वराः ? कथं च ते प्रयोज्या इत्यादयः विषयाः शिक्षाग्रन्थेषु विविच्यन्ते। नितिशतके भर्तृहरिः कथयति– "विद्याविहिनः पशुः" तद्वदेन ज्ञानं मनुष्यस्य तृतीयं नेत्रं कथितं "सा विद्या या विमुक्तये" कथयित्वा विद्यायाः लक्ष्यं निर्धारितम्। उपनिषदि सत्यं ज्ञानमनन्तं ब्रह्मा इत्यनेन शिक्षा आत्मज्ञान–ब्रह्मज्ञानश्च प्रदानकरणस्य प्रक्रियोच्यते। शिक्षा शब्दः संस्कृत व्याकरणस्य शिक्ष् विद्योपादाने इत्यस्माद्धातोः निष्पद्यते। अर्थात् शिक्ष्यते विद्योपादीयते इति शिक्षा। अस्याशयोऽस्ति विद्याग्रहणमेव शिक्षेति। शिक्षा शब्दः लेटिनभाषायाः एजुकेशन (Education) इत्यस्य पर्यायः अस्ति। अस्य मूलरूपं एडुकेटम् (Educatum) अस्ति। यस्यार्थः अस्ति – शिक्षणस्य कला। एकः अन्यः शब्दः अस्ति एडुकेयर (Educare), यस्यार्थः अस्ति – शिक्षितकरणम्, उत्थापनम् (To bring up) समक्षे आनयनम् (To bring forth), नेतृत्वप्रदानञ्च (To bring out)। एते सर्वे अर्थाः शिक्षायाः क्रियां प्रक्रियां प्रति सङ्केतयन्ति। अतः शिक्षा उदारसङ्कीर्णार्थेष्ववज्ञायते।

"सा विद्या या विमुक्तये" इत्यासीत् प्राचीनसमये, वेदानुसारं वर्तते यत् अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमस्ति इति। सा विद्येवोत्तमा या मुक्तं प्रददाति। वेद–शास्त्र–विज्ञानादीनां साध्वनुशीलने तत्वार्थज्ञानञ्च विद्या इति स्वीक्रियते। उपनिषदानुसारं विद्या द्विधा वर्तते – अपरा विद्या परा विद्या च। यया विद्यया लौकिकज्ञानस्य प्रातिर्भवति सा विद्या अपरा विद्या तथा यया विद्यया अक्षरब्रह्मविषयकज्ञानं प्राप्यते सा परा विद्या भवति। शिक्षा पदस्य निर्देशः, शिक्षणम्, प्रशिक्षणम्, अनुशासनम्, पालनम् पोषणञ्च संस्कृतिः चेत्याद्यर्थाः प्रतीयन्ते।

उपर्युक्तैः अर्थैः शिक्षा एका विकाससम्बन्धिनी प्रक्रिया वर्तते। अस्य विकासस्य गतिर्ज्ञातुं शिक्षायाः ज्ञानं परमावश्यकं भवति। शिक्षा शब्दस्तु प्रक्रियायाः द्योतकः। पूर्वमेव स्पष्टं यत् शैक्षिकसामाजिकविज्ञानयोः अन्योन्यप्रक्रियासु बलं दत्वा शिक्षा अर्थस्य कुञ्चिका स्वीकृता। अत्र शिक्षा सचेतनरूपे नियन्त्रता प्रक्रिया वर्तते यया व्यक्तिषु तथा च व्यक्तिषु तथा व्यक्तिभिः समूहे परिवर्तनमजायत।

अनया दृष्टया शिक्षा तादृशी प्रक्रिया वर्तते या खलु जन्मना एव प्रारभ्यते जीवनपर्यन्तञ्च प्रचलति। अत्र केषाञ्चिज्जनानां धारणा वर्तते यत् प्रत्येकानुभवस्य प्रभावः न्यूनाधिकं मानवस्य व्यवहारे आपतति, अतः शिक्षायां तस्य प्रभावोऽपि दृष्टिगोचरो भवति। चेदिदं सिद्धयति यत् शिक्षाजीवने वर्तते अथवा सम्पूर्णजीवनमेव शिक्षा वर्तते। अपि चात्र एवं न ज्ञातव्यं यत् विद्यालयेऽध्ययनमात्रं शिक्षा सीमितार्थे स्वीकृता, अपितु शिक्षा पदस्य समानार्थी आङ्गलभाषायाः म्कनबंजपवद शब्दस्य मुख्योद्देश्यं मानवव्यवहारे प्रभावोत्पादनं स्वीकृतम्। तथा च पितरौ परिवारस्यान्ये सदस्यश्चापि विद्यालयस्योपेक्षया न्यूनातिन्यूनं चेतनप्रभावं बालकेषु स्थापयन्ति।

डॉ. आर ए शर्मामहोदयः शिक्षायाः अर्थः स्पष्टयति यत् शिक्षा व्यापकस्वरूपतां प्रतिपादयति। सामान्यजनानां दृष्टिकोणं तु शिक्षा सङ्कुचितार्थं द्योतयति। एतन्नेव युक्तम्। लोकेऽस्मिन् विद्या एव तज्जनोति या मानवे ज्ञानद्योति प्रज्वालयति, अविद्यान्धतमसं व्यपोहरति, दुर्गुणत्रयं वारयतिसदगुणञ्च सञ्चारयति, कीर्तिं प्रथयति, गौरवं विकायति, यशो वितनोति, भूभ्रत्सु चादरमावहति। एषा मातृवत् संरक्षिका, पत्रवत् सत्पथप्रदर्शिका, कान्तावत् सुखदा मनोरञ्जिका च, वैभवदायिनी, दुर्गुणं नाशयित्वं मनः पवित्रयति। अतः सर्वमनोरथपूर्णत्वात् इयं कल्पतेति परिज्ञायते।

पैनीमहोदयेन शिक्षायारपरं प्रभेदमपि कृतं, यत् शिक्षायारभिप्रायस्तु वृद्धया अथवा विकासेन सिद्धयति। शिक्षया व्यवहारपरिवर्तनमनिवार्यतां भजते। सर्वेषां परिवर्तनानामर्थः वृद्धिरेव भवति। कस्यचिद् शिक्षायाः मार्गः चितो भवेत् अनुचितो वा तत्र वृद्धिरेव जायते। यः बालकः चौरसमूहे निवसन् राजपुरुषान् भ्रामयति, आपणात् सामग्रीः चोरयति। एवमेवान्यानि सामाजिकदुष्कृयानि सफलतापूर्वकं कुर्वन् स सिद्धतामवाप्नोति। तस्य एकं मार्गं प्रतिवद्धिः सिद्धयति तथा चानया सः शिक्षितोऽपि जायते। उपर्युक्तैः दृष्टान्तैः सङ्घटिता शैक्षिकप्रक्रिया विज्ञापयति यत् शिक्षायाः प्रक्रिया सैव सुनिश्चिता या प्रक्रिया विद्यालयपरिवारे वा अभिष्टव्यवहारपरिवर्तनार्थमुपयुक्तपरिस्थितिमुत्पादयति। एवञ्च नियोजनमपि करोति।

**सन्दर्भाः –**


1. चौबे आर के, भारत के प्रमुख शिक्षादर्शन, आविष्कार पब्लिशर्स डिष्ट्रीब्यूटर्स, जयपुर–2004।
2. बघेला डॉ. हेतसिंह, शिक्षा मनोविज्ञान, राजस्थान प्रकाशन जयपुर–2006 ।
3. त्यागी एवं पाठक, शिक्षा के दार्शनिक सिद्धान्त, विनोद पुस्तक मन्दिर, आगरा।
4. पाठक पी डी, भारतीय शिक्षा और समस्याएँ, विनोद पुस्तक मन्दिर, आगरा।



शोधसन्धाता, शिक्षा
जरारासंविवि.जयपुरम्

mbgraphic#9413453790